STARCEMENT
Solid Setting

* Discuss लक्षणा after विश्वनाथ कविराज ।

Ans. विश्वनाथ कविराजः तृतीये साहित्यदर्पणग्रन्थे लक्षणायाः स्वरूपं एवं रूपेण निरूपयति, तद्यथा :

" मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता ॥"

कारिकायाः सरलार्थः यथाः मुख्यार्थस्य अभिधेयार्थस्य बाधे अन्वयानुपपत्तिग्रहे सति, रूढेः अनादिवृद्धव्यवहार-प्रसिद्धिवशात्, प्रयोजनाद् उद्देश्यविशेषाद्वा यया शक्त्या, तद्युक्तः अन्यः द्वितीयोऽर्थः प्रतीयते बुध्यते असौ सा लक्षणा उच्यते । सा शक्तिः अर्पिता आरोपिता मुख्यार्थ-व्यवहितलक्ष्यार्थविषयकत्वात् अर्वाचीनैः शब्देषु कल्पितेत्यर्थः । मुख्यार्थबाधः मुख्यार्थयोगः, रूढिप्रयोजनान्यतरश्चेति त्रयं लक्षणायां हेतुः । रूढिप्रयोजनान्यतरहेतुत्वात् लक्षणा द्विधा विभक्ता । तद्यथा रूढिमूला प्रयोजनामूला च । तत्र रूढिलक्षणाया उदाहरणं यथा:- कलिङ्गः साहसिकः । इत्यत्र कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसम्भवन् स्वसंयुक्तान् कलिङ्गदेशरयि पुरुषादीन् प्रत्याययति ।

अत्र आधार आधेय भावसम्बन्धः। प्रसिद्धिरनादिवृद्धव्यवहार-
सिद्धिरेव अत्र हेतुः अतः रूढिलक्षणा। प्रयोजनलक्षणा यथा:
गंगायां घोषः। वाक्येऽस्मिन् गंगापदेन गंगाजलप्रवाहमेव
बोध्यते। जलमयार्थस्य घोषार्थेन सहान्वयानुपपत्तिः
सञ्जातः। कुतः, घोषो नामाभीरपल्ली, सा च कथं
जलमयां गंगायामुत्सहत इत्याशयः। अतः मुख्यार्थसम्बन्धिनः
(सामीप्यात्) गंगातटमेव लक्षणाया परिग्रहः। गंगायां
घोषः इत्यत्र लक्षणाप्रयोजनं हि शैत्यपावनत्वादिप्रतीति-
रूपस्य व्यङ्ग्यस्य प्रतिपादनम्। अथवा तीरस्य सन्निहितगत
शीतत्वादेरधिकमत्रातिशयबोधनं फलम्।